# कक्षा - XII (ऐच्छिकम्)
## 'संस्कृतम्'

समयः घण्टात्रयम् | पूर्णाङ्काः 100

**निर्देशः-**

(1) सर्वे प्रश्नाः संस्कृतेनैव उत्तरणीयाः।

(2) उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि?

(3) अस्मिन् पत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः 'क' | (अपठितांश-अवबोधनम्) | 15 अङ्काः |
| खण्डः 'ख' | (रचनात्मक लेखनम्) | 15 अङ्काः |
| खण्डः 'ग' | (पठितांश-अवबोधनम्) | 50 अङ्काः |
| खण्डः 'घ' | (छन्दोऽलङ्काराः) | 20 अङ्काः |

## खण्डः 'क' **15**
## अपठितांश- अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत।** 05

**(अ) प्रथमः अनुच्छेदः**

अष्टादश पुराणानां सारः अस्ति- 'परोपकारः पुण्याय पापाय परपीडनम्' इति। परेषाम् प्राणिनाम् उपकारः परोपकारः कथ्यते। मनुष्यः सदयः सहृदयः च भूत्वा प्राणिनां सर्वथा हितं चिन्तयेत्। ते जनाः नूनं धन्याः ये प्राणिनां हितेच्छया जीवनस्य धनस्य च त्यागं कुर्वन्ति। उपकृतः जनः प्रसन्नः सन् उपकारिणं प्रति हृदयेन शुभं वाञ्छति। परोपकारेण न केवलम् अन्यः जनः सुखी भवति अपि तु अनेन आत्मतुष्टिः अपि भवति। लोके यशः प्रसरति परलोके च शान्तिः। अतः अस्माभिः यथाशक्ति मनसा परोपकारः एव चिन्तनीयः विधेयः च।

I एकपदेन उत्तरत। ½×2=1

(i) आत्मतुष्टिः केन भवति?

(ii) उपकारेण लोके किं प्रसरति?

II पूर्णवाक्येन उत्तरत। 2×1=2

(i) कीदृशाः जनाः धन्याः भवन्ति?

(स) यथानिर्देशम् उत्तरत। ½×4=2

(i) 'चिन्तयेत्' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'परोपकारः' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(iii) उपकृतः जनः उपकारिणं प्रति हृदयेन शुभं वाञ्छति अत्र विशेषणपदं किम्?

(iv) 'ये प्राणिनां हितेच्छया' अत्र 'ये' सर्वनामपदं केभ्यः प्रयुक्तम्?

**(आ) द्वितीयः अनुच्छेदः** **10**

महाकविः बाणभट्टः संस्कृत गद्यसम्राट इति प्रसिद्धः। तस्य जीवनं तपोमयम् आसीत्। बाल्यकाले एव सः मातृहीनः जातः। अस्य पिता एव एनं पालितवान्। अयं बाल्यकालादेव कुशाग्रबुद्धिः आसीत्। सः बाल्ये एव शास्त्राणि अधीतवान्। यदा अयं चतुर्दशवर्षीयः जातः तदा अस्य पिता अपि दिवंगतः। शोकार्तः सः स्वमित्रैः सह गृहात् बहिः निरगच्छत्। यत्र तत्र भ्रमित्वा सः ज्ञानार्जनम् अकरोत्। सः विविधकलासु विद्यासु च निपुणः जातः। तस्य प्रसिद्धिं श्रुत्वा सम्राट् हर्षवर्धनः तं स्वराजसभायाम् सादरम् अहूतवान् तत्र स प्रभूतधनप्रदानेन सत्कृतः। बाणः प्रसन्नौ भूत्वा 'हर्षचरितम्' इति गद्यकाव्यम् अरचयत्। तस्मिन् सः आत्मनः कुलस्य परिचयं राज्ञः हर्षस्य च राज्यकौशलम् अवर्णयत्। 'कादम्बरी' अस्य कवेः द्वितीया सर्वोत्कृष्टा रचना विद्यते। तत्र कवेः नैपुण्यम् अद्भुतम् एव। श्लेषस्य छटा तु अद्भुता एव। परं सहसा बाणभट्टः कादम्बरीम् अपूर्णामेव त्यक्त्वाः परलोकं गतः। ततः अस्य पुत्रः पुलिन्दः कादम्बर्याः, उत्तरभागं रोचकतथ्यैः सह पूर्णं कृतवान्। असौ रचना कथाग्रन्थरुपेण अद्यापि ख्यातिं लभते।

½×4=2

I एकपदेन उत्तरत।

(i) बाल्ये बाणभट्ं कः पालितवान्?

(ii) सः शास्त्राणि कदा अधीतवान्?

(iii) बाणः किं गद्यकाव्यम् अरचयत्?

(iv) कथाग्रन्थरूपेण ख्यातिं का लभते? 1×2=2

II पूर्णवाक्येन उत्तरत।

(i) कः सम्राट् बाणभट्टं स्वराजसमायां सम्मानितवान्?

(ii) पुलिन्दः किम् अकरोत्?

III यथानिर्देशम् उत्तरत। 1×4=4

(i) 'अवर्णयत्' इति क्रियापदस्य कर्तृपदं किम्?

(ii) 'सर्वोत्कृष्टा' इति पदस्य विशेष्यपदं किं प्रयुक्तम्?

(iii) 'तस्य प्रसिद्धिं श्रुत्वा' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्।

(iv) 'मन्दबुद्धिः' इति पदस्य विलोमपदं किं प्रयुक्तम्? 1×2=2

IV अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

## खण्डः 'ख' **15**

## रचनात्मक–लेखनम्

**2.** मञ्जूषातः उचितसङ्केतपदानि गृहीत्वा अधोलिखितं कथां प्रपूर्य उत्तरपुस्तिकायां लिखत। 1×10=10

एकदा गुरुनानकः स्वशिष्यैः सह एकं ग्रामं गतवान्। ग्रामवासिनः महता उत्साहेन गुरुनानकस्य (i) .............................. कृतवन्तः। ते परमश्रद्धया तस्य (ii) .............................. श्रुत्वा आनन्दिताः जाताः। यदा सशिष्यः गुरुनानकः तस्माद् ग्रामात् गन्तुम् (iii) .............................. तदा बहवः (iv) .............................. समागताः। सः तेभ्यः (v) .............................. दत्तवान्– ''सर्वे भवन्तः स्थानभ्रष्टाः ते अन्यं ग्रामं प्रति (vi) ..............................। तत्रत्याः जनाः बहुदुष्टाः आसन्। अपमानितः अपि नानकः तत्र धैर्यपूर्वकम् अवसत्। अन्तिमे दिने ततः गमनसमये तान् ग्रामवासिनः प्रति सः अवदत्– ''भवन्तः सुखसम्पन्नाः अत्रैव (vii) ..............................। शिष्याः विचित्रम् आशीर्वादं श्रुत्वा (viii) .............................. जाताः। यदा एकः शिष्यः अस्य तात्पर्यम् पृष्टवान् तदा गुरुनानकः सस्मितम् अवदत्– ''सज्जनाः यत्र गच्छन्ति तत्र लोकस्य (ix) ..............................एव भवति। दुर्जनाः तु यत्र गमिष्यन्ति ते जनान् पीडयिष्यन्ति एव। गुरोः वचनेन शिष्याः (x) ..............................अवनताः जाताः।

मञ्जूषा–

| |
|---|
| उपदेशं, श्रद्धालवः, स्वागतं, ऐच्छत्, आशीर्वादं, वसन्तु, हितम्, चकिताः, प्रचलिताः, श्रद्धया |

**3.** मञ्जूषातः उचितपदानि गृहीत्वा 'सदाचारः' इति विषयम् आधृत्य संस्कृतेन पञ्च वाक्यानि लिखत। 1×5=5

मञ्जूषा–

| |
|---|
| गृहे, समाजे, सर्वत्र, विनम्रता, गुरूणां सम्मानम्, निश्छलव्यवहारः सताम् आचारः, शिष्टम् आचरणम्, राष्ट्रभक्तिः, अनुशासनम्, परेषाम् उपकारः, श्रमेण, सत्यं प्रियं वचनम्, सहयोगः, लोभत्यागः ईर्ष्यारहितः। |

## खण्डः 'ग' 50

## पठितांश–अवबोधनम्

**4.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांश च पठित्वा प्रदत्तप्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत। 5+5+5 =15

(क) गद्यांशः

(i) तदतिकुटिलचेष्टादारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि च यौवने कुमार! तथा प्रयतेथाः यथा नोपहस्यसे जनैः न निन्द्यसे साधुमिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न वञ्चयसे धूर्तेः, न विडम्ब्यसे लक्ष्म्या नाक्षिप्यसे विषयैः, नापह्रियसे सुखेन।

प्रश्नाः ½×2=1

I एकपदेन उत्तरत।

(i) त्वं कैः न निन्धसे?

(ii) त्वं कया न विडम्ब्यसे? 2×1=2

II पूर्णवाक्येन उत्तरत।

(i) कीदृशे यौवने सावधानतया भवितव्यम्? 1×2=2

(स) यथानिर्देशम् उत्तरत।

(i) 'अतिकुटित्मचेष्टादारुणे' इति पदस्य विशेष्यपदं किम्?

(ii) 'मित्रैः' इतिपदस्य पर्यायपदं किं प्रयुक्तम्?

(ख) पद्यांशः

मनसि वचसि काये पुण्यपीयूषपूर्णा
स्त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।

I एकपदेन उत्तरत। ½×2=1

(i) सन्तः उपकारश्रेणिमिः कम् प्रीणयन्तः राजन्ते?

(ii) सन्तः परगुणपरमाणून कुत्र विकसन्तः शोभन्ते? 2×1=2

II पूर्णवाक्येन उत्तरत।

सज्जनाः मनसि वचसि काये कीदृशाः भवन्ति?

III यथानिर्देशम् उत्तरत। 1×2=2

(i) कियन्तः इति पदस्य विशेष्यपदं किम्?

(ii) 'अपकार' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(ग) नाट्यांशः

**पुरुषः**– धिक् चपल! किमुक्तवानसि? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृष्टां वाचं न सहन्ते। राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः सोऽप्यपूर्वारण्यदर्शनाक्षिप्रप्रदयो न यावदायाति, तावत् त्वरितमनेन तरुगहनेनापसर्पत।

**बटवः**– कुमार! कृतं कृतमश्वेन। तर्जयन्ति विस्फारितशरासनाः कुमारमायुधश्रेणयः।

**लवः**– किं नाम विस्फुरन्ति शस्त्राणि? (इति धनुरारोपयति)

½×2=1

I एकपदेन उत्तरत।

(i) आयुधश्रेणयः कीदृशाः?

(ii) राजपुत्रः कः? 2×1=2

II पूर्णवाक्येन उत्तरत।

कुमारं काः तर्जयन्ति? 1×2=2

III यथानिर्देशमुत्तरत।

(i) 'वाचम्' इत्यस्य विशेषणपदं किं प्रयुक्तम्?

(ii) 'शीघ्रम्' इति पदस्य पर्यायपदं किम्?

**5.** रेखाङ्कितपदानां शुद्धम् अर्थं प्रदत्तार्थेभ्यः चित्वा लिखत। ½×4=2

(i) एषः कः अस्मांक <u>लोचने</u> शीतलयति?

(अ) शरीरे (ब) हृदये

(स) नेत्रे (द) तित्रे

(ii) इह कर्माणि कुर्वन् जिजीविषेत् शतं <u>समाः</u>।

(अ) संख्याः (ब) वर्षाणि

(स) सदृशाः (द) निस्पृहाः

(iii) तस्मादसक्तः <u>सततं</u> कार्यं कर्म समाचर।

(अ) निरन्तरम् (ब) अत्यन्तं

(स) विस्तृतम् (द) अहर्निशम्

(iv) भगवान् यीशुस्तव मङ्गलं <u>वितनोतु</u>।

(अ) भवतु (ब) विस्तारयतु

(स) चिन्तयतु (द) चिनोतु

**6.** अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। 1×4=4

(i) ब्राह्मणः <u>रत्नानि</u> गृहीत्वा उज्जयिनीं गतवान्।

(ii) राजवचनम् अनुगच्छति जनो <u>भयात्</u>।

(iii) <u>पृथिव्याः</u> सप्रभेदाः सन्ति।

(iv) <u>षड्विधं</u> प्रीतिलक्षणम्।

**7** अधोलिखितश्लोकयोः प्रदत्तभावार्थयोः रिक्तस्थानपूर्तिः मञ्जूषापदानां सहायतया कार्या। 3+3=6

(अ) सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम्
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः।।

**भावार्थः**- महाकवेः भारवेः इदं पद्यम्। एतदनुरूपं मनुष्येण कदापि (i) ................................ किमपि कार्यं न कर्तव्यम्। यतः (ii) ................................ विना यत्कार्यं क्रियते, तस्मिन् अनेकाः विपत्तयः आपतन्ति। ये विचार्य कार्यं कुर्वन्ति तेषां पार्श्वे स्वयमेव गुणप्रियाः (iii) ................ ................ आयान्ति।

(आ) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

**भावार्थः**– श्रीकृष्णस्य अर्जुनं प्रति गीतायाम् अयम् उपदेशः। हे अर्जुन! (i) ................................ लोके यत् यत् आचरणं (ii) ................................ तत् तत् एव आचरणम् अन्ये जनाः अपि कुर्वन्ति। स श्रेष्ठः जनः यत् (iii) ................................ प्रस्तौति अन्ये अपि तमेव अनुसरन्ति।

**मञ्जूषा**–

| |
|---|
| प्रस्तौति, सुचिन्तनं, सम्पत्तयः, अविचार्य, महापुरुषः, प्रमाणम् |

8. अधोलिखितश्लोकयोः प्रदत्तान्वययोः रिक्तस्थानानि पूरयत। 1½+1½=3

(अ) सर्वत्र नो वार्तमवेहि राजन्!
नाथे कुतस्त्वय्यशुभं प्रजानाम्।
सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा।।

**अन्वयः** राजन! सर्वत्र नः वार्तम् अवेहि, त्वयि नाथे (i) ........................................ अशुभम् कुतः। सूर्ये तपति लोकस्य (ii) ........................................ आवरणाय तमिस्रा कथम् (iii) ........................................ ।

(आ) अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम्।
रमते न मरालस्य मानसं मानसं विना।।

**अन्वयः** यद्यपि (i) ........................................ नीरजराजितम् (ii) ........................................ अस्ति, (तथापि) मरालस्य मानसम् (iii) ........................................। विना न रमते।

9 यथानिर्देशम् उत्तरत। 1×2=2

(क) कः कम् कथयति?
(i) आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्।
(ii) कुमार! कृतं कृतमश्वेन। 1×2=2

(ख) विशेष्यपदं चित्वा लिखत।
(i) यः आपद्गतं मित्रं न जहाति।
(ii) कौत्सः प्रपेदे वरतन्तुशिष्यः।

(ग) कर्तृपदं चिनुत। 1×2=2
(i) पश्यतु कुमारस्तावदाश्चर्यम्।

(ii) केयूराणि न भूषयन्ति पुरुषम्।। 1×2=2

(घ) अत्र रेखाङ्कितसर्वनामपदे काभ्यां प्रयुक्ते?

(i) समाप्रविधेन मया महर्षि र्विज्ञापितोऽभूद् गुरुदक्षिणायै।

(ii) लेखिका आसीत् सुश्री मेरी यस्याः पार्श्वे सः प्रतिमासं धनं प्रेषयति स्म।

(ङ) अधोलिखितपङ्क्तिमध्ये मेघः, सूर्यः इति पदयोः समानार्थकपदे चित्वा लिखत। 1×2=2

''गिरौ कलापी गगने पयोदो लक्षान्तरेऽर्कश्च
जले च पद्मम्''।।

**अथवा**

अधोलिखितपंक्तिषु 'कायरम्, दुर्जनम्' इति पदयोः विलोमपदचयनं कुरुत। सुजनं न पश्यति। शूरं कण्टकमिव परिहरति। विनीतं नोपसर्पति'।

**10.** (क) अधोलिखितकवीनां काव्यैकस्य नाम लिखत। 1×5=5

भवभूतिः, भारविः, माघः, कालिदासः, महर्षि वेदव्यासः

(ख) अधोलिखित रचनानां लेखकानां नामानि लिखत। 1×5=5

पाषाणीकन्या, शिवराजविजयम् प्रबन्धमञ्जरी, समुद्रसङ्गमः, नीतिशतकम्

## खण्डः 'घ' **20**

## छन्दोऽलङ्काराः

11 (अ) प्रश्नान् उत्तरत। 1×2=2

(i) 'चन्द्रमसः' अत्र च वर्णः लघुः दीर्घः वा?

(ii) मगणस्य स्वरूपं लिखत।

(ब) अधोलिखितपरिभाषाः पूरयत। 1×4=4

(i) जतौ तु वंशस्य ..............................................।

(ii) रसै रुद्रैश्छिन्ना ..............................................शिखरिणी।

(iii) स्यादिन्द्रवज्रा ..............................................।

(iv) उक्ता वसन्ततिलका ..............................................।

(स) एकस्य छन्दसः उदाहरणं लिखत। 2×1=2

अनुष्टुप्, मालिनी

(द) अधोलिखितश्लोकस्य चरणे किं छन्दः? 2×1=2

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः।

**अथवा**

सत्सङ्गतिः कथय किं न करोति पुंसाम्।

12 (i) कस्याचिदेकस्य शब्दालंकारस्य सोदाहरणं लक्षणं लिखत। 1×3=3

अनुप्रासः, श्लेषः

(ii) कस्यचिदेकस्य अर्थालङ्कारस्य लक्षणोदाहरणे लिखत। 1×3=3

उपमा, उत्प्रेक्षा

**13** (अ) अधः प्रदत्तासु पंक्तिषु अलङ्कारं निर्दिशत। 1×2=2

(i) स्थितः पृथिव्या इव मानदण्डः।

(ii) रमते न मरालस्य मानसं मानसं विना।

(आ) अधोलिखितपरिभाषाद्वयं पूरयत। 1×2=2

(i) रूपकं रूपितारोपो ..............................................।

(ii) सत्यर्थे पृथगर्यायाः ..............................................।